प्रत्यक्षात् प्रमाणात् देवतापरिचारकाणाम् अभिप्रायः इत्यवगम्यते, स न शक्यो बाधितुम्। येऽपि देवताम् ईशानां वर्णयन्ति, तेऽपि न अपह्नुवते परिचारकाणाम् अभिप्रायम्। किं चाहुः, तथा देवता करोति, यथा परिचारकाणाम् अभिप्रायो भवति इति, न च, स ईशानो भवति, यः पराभिप्रायम् अनुरुध्यते, यस्य न स्वाभिप्रायात् विनियोगो भवति। अपि च, न च एतद्वचनं, वर्त्तमानकालोपदेशत्वात्, प्रत्यक्षविरोधात्, स्तुतिवादोऽवधार्य्यते, स्तुतिवादे च सम्भवति न वचनप्रामाण्यात् ईशिष्यते इति गम्यते। न च, देवता फलेन सम्बध्नाति, या तदर्थं परिचर्य्येत। यदुक्तं, स्तुत्युपचारान्यार्थदर्शनैर्ददाति प्रसीदति च इति। तत्र स्तुत्युपचारयोर्व्यक्तं यत् अन्यार्थदर्शनं तस्मै प्रीता इषमूर्ज्जम् इति, तन्न, अन्यस्य विधेराम्नानात् दक्षिणतः सम्परिहर्त्तव्या इत्याह" तथा "तृप्त एवैनम् इन्द्रः प्रजया पशुभिस्तर्पयति" इति अत्र ऐन्द्रस्य हविषो विधातारम्। तस्मात् देवता न प्रयोजिका इति" भा०। "अतिथौ तत्प्रधानत्वमभावः कर्म्मणि स्यात्तस्य प्रीतिप्रधानत्वात्" सू०। "यदुक्तम् अतिथिवत् इति तत् परिहर्त्तव्यम् आतिथ्यम् अतिथिप्रयुक्तं स्यात् आतिथ्ये हि तत् प्रीतिर्विधीयते अतिथिः परिचरितव्यः यथा प्रीयते तथा कर्त्तव्यम् इति। भोजनं दानं वा कार्य्यम् इति यद्यत् अतिथये रोचते तत् कर्त्तव्यं यत् तस्मै न रोचते न तत् बलात् कारयितव्यम् इति इह तु कर्म्मणि अभावः प्रीतिविधानस्य। तस्मात् विषमम् अतिथिना" शवरभाष्यम्। तदेतद्वेदान्तिभिर्न मन्यते तैर्हि तेषां विग्रहत्त्वमङ्गीकृतं तथाच शङ्कापूर्व्वकं देवानां विग्रहवत्त्वं शा० सूत्रे तद्भाष्ये च व्यवस्थापितं यथा। "विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्द्दर्शनात्" शा० सू० 'स्यादेतत् यदि विग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारोवर्ण्येत विग्रहवत्त्वादृत्विगादिवदिन्द्रादीनामपि स्वरूपसन्निधानेन योगेऽङ्गभावोदृश्यते न च सम्भवति। बहुषु युगपदेकस्येन्द्रस्य स्वरूपसन्निधानानुपपत्तेरिति चेन्नायमस्ति विरोधः कस्मात्? अनेकप्रतिपत्तेः एकस्यापि देवात्मनोयुगपदनेकस्वरूपप्रतिपत्तिः सम्भवति। कथमेतदवगम्यते? दर्शनात्। तथाहि "कति देवाः"? इत्युपक्रम्य "त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रेति" निरुच्य" कतमे ते? इत्यस्यां पृच्छायां "महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतान्दर्शयति। तथा त्रयस्त्रिंशतोऽपि षड़ाद्यन्तर्भावक्रमेण "कतमएको देव इति प्राण" इति प्राणैकरूपतान्देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतान्दर्शयति। तथा स्मृतिरपि "आत्मनो वै सहस्राणि बहूनि भरतर्षभ! कुर्य्याद्योगी बलं प्राप्य तैश्च सर्वैर्महीञ्चरेत्। प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रन्तपश्चरेत्। संक्षिपेत्तु पुनस्तानि सूर्य्यो रश्मिगणानिव" इत्येवञ्जातीयका प्राप्ताणिमाद्यैश्वर्य्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति किमु वक्तव्यमाजानसिद्धानां देवानाम्। अनेकरूपप्रतिपत्तिसम्भवाच्चैकैका देवता बहुरूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छति, परैश्च न दृश्यतेऽन्तर्द्धानादिशक्तियोगादित्युपपद्यते। अनेकप्रतिपत्तेर्द्दर्शनादित्यस्यापरा व्याख्या। विग्रहवतामपि कर्माङ्गभावचोदनास्वनेका प्रतिपत्तिर्दृश्यते। क्वचिदेकोविग्रहवाननेकत्र न युगपदङ्गभावं गच्छति यथा बहुभिर्भोजयद्भिर्नैकोब्राह्मणो युगपद्भोज्यते। क्वचिच्चैको विग्रहवाननेकत्र युगपदङ्गभावं गच्छति यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते तद्वदिहोद्देशपरित्यागात्मकत्वाद्यागस्य विग्रहवतीमप्येकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत् परित्यक्ष्यन्तीति विग्रहवत्त्वेऽपि देवानां न किञ्चित् कर्मणि विरुध्यते" भा०। "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" सू०। "मा नाम विग्रहवत्त्वे देवादीनामुपगम्यमाने कश्चिद्विरोधः प्रसञ्जि, शब्दे तु विरोधः प्रसज्येत, कथम्? औत्पत्तिकं हि शब्दस्यार्थेन सम्बन्धमाश्रित्यानपेक्षत्वादिति वेदस्य प्रामाण्यं स्थापितम्। इदानीन्तु विग्रहवती देवताऽभ्युपगम्यमाना यद्यप्यैश्वर्य्ययोगाद्युगपदनेककर्मसम्बन्धीनि हवींषि भुञ्जीत तथापि विग्रहयोगादस्मदादिवज्जननमरणवती सेति नित्यस्य शब्दस्यानित्येनार्थेनानित्यसम्बन्धे प्रमीयमाणे यद्वैदिके शब्दे प्रामाण्यं स्थितं तस्य विरोधःस्यादिति चेन्नायमप्यस्ति विरोधः कस्मात्? अतः प्रभवात् अतएव हि वैदिकाच्छब्दाद्देवादिकञ्जगत् प्रभवति। ननु जन्माद्यस्य यत इति ब्रह्मप्रभवत्वं जगतोऽवधारितं कथमिह शब्दप्रभवत्वमुच्यते?। अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः कथमेतावता विरोधः शब्दे परिहृतः? यावता वसवोरुद्रा आदित्याविश्वेदेवामरुत इत्येतेऽर्था अनित्या एव, उत्पत्तिमत्त्वात् तदनित्यत्वे तद्वाचकानां वैदिकानां वस्वा-